पाणिः, स्त्री, (पणायन्ति व्यवहरन्त्यस्यामिति । पण+"अशिपणाय्यो रुडायलुकौ च ।" उणां ४ । १३२ । इति इण् आयप्रत्ययस्य लुक् च ।) पण्यवीथी । हट्टः । इत्युणादिकोषः ॥

पाणिः, पुं, (पणायन्ते व्यवहरन्त्यनेन । पण ङ व्यवहारे + "अशिपणाय्यो रुडायलुकौ च ।" उणां ४ । १३२ । इति इण् आयप्रत्ययस्य लुक् च ।) स च मणिबन्धावध्यङ्गुलिपर्य्यन्तभागः । स तु गर्भस्थबालकस्य मासद्वयेन भवति ॥ इति सुखबोधः ॥ तत्पर्य्यायः । पञ्चशाखः २ शयः ३ समः ४ हस्तः ५ करः ६ । इत्यमरभरतौ ॥ भुजः ७ । इति जटाधरः ॥ कुलिः ८ । इति शब्दरत्नावली ॥ भुजादलः ९ । इति त्रिकाण्डशेषः ॥ (यथा, देवीभागवते । २ । २ । १९ ।

"मृगनाभिसुगन्धां तां कृत्वा कान्तां मनोरमाम् ।
जग्राह दक्षिणे पाणौ मुनिर्म्मन्मथपीड़ितः ॥")

कुलिकच्चः । इति रत्नमाला ॥ कुलियाकड़ा इति भाषा ॥

पाणिकच्छपिका, स्त्री, (कच्छपः कूर्म्मस्तदाकारोऽस्त्यस्याः । कच्छप+ठन् । टापि अत इत्वञ्च । पाणिभ्यां कृता कच्छपिका कूर्म्माकृतिमुद्रा ।) कूर्म्ममुद्रा । यथा,—

"पाणिकच्छपिकां कुर्य्यात् कूर्म्ममन्त्रेण साधकः ।
तत्र संस्कृतपुष्पेण पूजयेदात्मनो वपुः ॥
पूजितं तेन पुष्पेण देवत्वं तस्य जायते ॥"

कूर्म्ममन्त्रो यथा,—

"द्वितीयं वैष्णवीतन्त्रं बीजं बिन्दिन्दुसंयुतम् ।
षष्ठस्वरो परिचरं कूर्म्मबीजं प्रकीर्त्तितम् ॥"

इति कालिकापुराणे ५६ अध्यायः ॥

पाणिगृहीती, स्त्री, (पाणिर्गृहीतो यस्याः । "पाणिगृहीती भार्य्यायाम् ।" ४ । १ । ५२ । इत्यस्य वार्त्तिकोक्त्या ङीष् ।) विधानेनोढ़ा । इत्यमरः । २ । ६ । ५ ॥

पाणिग्रहणं, क्ली. (पाणेर्ग्रहणं यत्र ।) विवाहः । इति हेमचन्द्रः । ३ । १८२ ॥ (यथा, रघुः । ७ । २९ ।

"इति स्वसुर्भोजकुलप्रदीपः
सम्पाद्य पाणिग्रहणं स राजा ।
महीपतीनां पृथगर्हणार्थं
समादिदेशाधिकृतानधिश्रीः ॥")

पाणिघः, पु, (पाणिं पाणिना वा हन्तीति । हन+"पाणिघताड़घौ शिल्पिनि ।" ३ । २ । ५५ । इति टक् टिलोपो घत्वञ्च निपात्यते ।) पाणिवादः । पाणिना मृदङ्गादिवाद्यम् । पाणिं वा हन्ति यः । यः पाणिनैव मृदङ्गादिवाद्यमुत्पादयति तत्र । यः पाणिना मृदङ्गमिव पाणिं वादयति तत्र च । इत्यमरभरतौ ॥

पाणिघातः, पुं, (पाणिना हन्तीति । हन्+अशिल्पित्वात् अण् ।) पाणिताड़कः । इति सिद्धान्तकौमुदी ॥ (हन+भावे घञ् । पाणिना घातो हननमिति । पाणिहननम् ॥)

पाणिजः, पुं, (पाणौ जायते इति । पाणि+जन्+"सप्तम्यां जनेर्डः ।" ३ । २ । ९७ । इति डः ।) नखः । इति हलायुधः ॥

पाणितलं, क्ली, (पाणितलमिव परिमाणमस्यास्येति । अच् ।) कर्षपरिमाणम् । तोलकद्वयम् । इति वैद्यकपरिभाषा ॥ (पर्य्यायोऽस्य यथा,—

"कोलद्वयञ्च कर्षः स्यात् स प्रोक्तः पाणिमानिका ।
अक्षं पिचुःपाणितलं किञ्चित् पाणिश्च तिन्दुकम् ॥
विड़ालपदकञ्चैव सुवर्णं कवलग्रहः ।
उदुम्बरञ्च पर्य्यायैः कर्ष एव निगद्यते ॥"

इति शार्ङ्गधरे पूर्व्वखण्डे प्रथमेऽध्याये ॥

पर्य्यायान्तरं यथा,—

"विद्यात् द्वंक्षणौ कर्षं सुवर्णञ्चाक्षमेव च ।
विड़ालपदकन्तच्च पिचुम्पाणितलन्तथा ॥
तिन्दुकञ्च विजानीयात् कवड़ग्रहमेव च ॥"

इति चरके कल्पस्थाने द्वादशेऽध्याये ॥

पाणेस्तलम् ।) हस्ताधोभागः ॥ (यथा, मनौ । ४ । १४३ ।

"स्पृष्ट्वैतानशुचिर्नित्यमद्भिः प्राणानुपस्पृशेत् ।
गात्राणि चैव सर्व्वाणि नाभिं पाणितलेन तु ॥")

पाणिनः, पुं, (पणिनो मुनेर्गोत्रापत्यम् । पणिन्+अण् । "गाथिविदथिकेशिगणिपणिनश्च ।" ६ । ४ । १६५ । इति न टिलोपः ।) पाणिनिमुनिः । इति त्रिकाण्डशेषः ॥

पाणिनिः, पुं, (पणिनो मुनेर्युवापत्यम् । पणिन्+इञ् । न टिलोपः ।) मुनिविशेषः । तत्पर्य्यायः । आहिकः २ दाक्षीपुत्त्रः ३ शालङ्की ४ पाणिनः ५ शालातुरीयः ६ । इति त्रिकाण्डशेषः ॥ * ॥ (अयं हि पणिन्-वंशसम्भूतः प्रसिद्धो व्याकरणकर्त्ता । अस्य माता दाक्षी इत्याख्यया विश्रुता । यथा, पातञ्जलकारिकायाम् । १ । १ । २० ।

"सर्व्वे सर्व्वपदादेशा दाक्षीपुत्त्रस्य पाणिनेः ॥"

तथाच शिक्षायाम् । ५६ ।

"शङ्करः शाङ्करीं प्रादाद्दाक्षीपुत्त्राय धीमते ।
वाङ्मयेभ्यः समाहृत्य देवीं वाचमिति स्थितिः ॥"

अस्य शालातुरीय इत्याख्यापि दृश्यते । यथा, अभिधानचिन्तामणौ । ३ । ५१५ ।

"————————अथ पाणिनौ ।
शालातुरीयदाक्षेयौ————————॥"

"गान्धारप्रदेशविशेषशलातुरग्रामजातत्वादेवास्य तथा नाम ।" इति चिन्तामणिटीका ॥ परे तु शलातुरग्रामोऽस्य जन्मस्थानमिति न स्वीकुर्व्वन्ति । यतः शलातुरोऽभिजनोऽस्य इति व्युत्पत्त्या शालातुरशब्देन शलातुरदेशोद्भवे जने एवार्थो नावगम्यते । अष्टाध्यायीसूत्रपाठस्य "तूदीशलातुरवर्म्मतीकूचवारात् ढक्छण् ढञ् यकः ।" ४ । ३ । ९४ । सूत्रात् अभिजनार्थे एव छण्प्रत्ययः । वृत्तिकारभट्टोजीदीक्षितेन तु "अभिजनश्च ।" ४ । ३ । ९० । इति सूत्रे "यत्र स्वयं वसति स निवासः । यत्र पूर्व्वैरुषितं सोऽभिजनः ।" इत्यभिजनशब्दस्यार्थः प्रदर्शितः । अतः स्पष्टतः शलातुरप्रदेशः पाणिनेः पूर्व्वपुरुषाणां वासस्थानमित्येवावगम्यते नतु तस्येति ।

पुरा किल कात्यायननामा मुनिः सप्तलक्षश्लोकात्मकं बृहत्कथाभिधानं ग्रन्थं विरचय्य काणभूतये श्रावयामास । सोमदेवभट्टस्तु ततः सारांशं समुद्धृत्य कथासरित्सागर इत्याख्यया प्रसिद्धं ग्रन्थं निर्म्मितवान् तस्मादेषाख्यायिका समधिगम्यते । यथा, तत्रैव । ४ । २०—९५ ।

"अथ कालेन वर्षस्य शिष्यवर्गो महानभूत् ।
तत्रैकः पाणिनिर्नाम जड़बुद्धितरोऽभवत् ॥
स शुश्रूषापरिक्लिष्टः प्रेषितो वर्षभार्य्यया ।
अगच्छत् तपसे खिन्नो विद्याकामो हिमालयम् ॥
तत्र तीव्रेण तपसा तोषितादिन्दुशेखरात् ।
सर्व्वविद्यामुखं तेन प्राप्तं व्याकरणं नवम् ॥
ततश्चागत्य मामेव वादायाह्वयते स्म सः ।
प्रवृत्ते चावयोर्वादे प्रयाताः सप्तवासराः ॥
अष्टमेऽह्नि मया तस्मिन् जिते तत्समनन्तरम् ।
नभःस्थेन महाघोरो हुङ्कारः शम्भुना कृतः ॥
तेन प्रनष्टमैन्द्रन्तदस्मद्व्याकरणं भुवि ।
जिताः पाणिनिना सर्व्वे मूर्खीभूता वयं पुनः ॥
अथ संजातनिर्व्वेदः स्वगृहस्थितये धनम् ।
हस्ते हिरण्यदत्तस्य विधाय वणिजो निजम् ॥
उक्त्वा तच्चोपकोशायै गतवानस्मि शङ्करम् ।
तपोभिराराधयितुं निराहारो हिमाचलम् ॥"

* * * *

"अत्रान्तरे तुषाराद्रौ कृत्वा तीव्रतरं तपः ।
आराधितो मया देवो वरदः पार्व्वतीपतिः ॥
तदेव तेन शास्त्रं मे पाणिनीयं प्रकाशितम् ।
तदिच्छानुग्रहादेव मया पूर्णीकृतञ्च तत् ॥"

* * * *

"वर्षोऽथ मन्मुखादैच्छत् श्रोतुं व्याकरणं नवम् ।
ततः प्रकाशितं स्वामिकुमारेणैव तस्य तत् ॥
ततो व्याड़ीन्द्रदत्ताभ्यां विज्ञप्तो दक्षिणां प्रति ।
गुरुवर्षोऽब्रवीत् स्वर्णकोटिर्मे दीयतामिति ॥
अङ्गीकृत्य गुरोर्वाक्यं तौ च मामित्यवोचताम् ।
एहि राज्ञः सखे ! नन्दात् याचितुं गुरुदक्षिणाम्
गच्छामो नान्यतोऽस्माभिरियत् काञ्चनमाप्यते ।
नवाधिकाया नवतेः कोटीनामधिपो हि सः ॥"

इत्युपाख्यानेन पाणिनिः कात्यायनस्य राज्ञो नन्दस्य च समसामयिक इत्येवायाति । परं कात्यायनपाणिन्योः शब्दशास्त्रपाठेन पाणिनिः कात्यायनात् पूर्व्वतन इत्यनायासेनैव विज्ञायते । यतः कात्यायन एव पाणिनिकृतव्याकरणस्य वार्त्तिककारः । स च स्वकृतग्रन्थे विदुषां वरं पाणिनिं आचार्य्यत्वेन स्वीकृतवान् । [६ । ४ । १०४ । सूत्रस्य वार्त्तिं ।] पाणिनिस्तु स्वीयव्याकरणे पूर्व्वतनानां बहूनां विदुषां नामोल्लेखं कृतवान् परं कुत्रापि कात्यायनस्य नाम नाभिहितवानतः स्पष्टतोऽवगम्यते पाणिनिः कात्यायनात् वृद्धतर इति ।

अनेन महात्मना पाणिना रचितं व्याकरणं पाणिनीयाष्टकमित्याख्यया प्रसिद्धम् । कात्ययन